अथ मलावहपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
कृमिकीटपक्षिणां हननम्। मद्यानुगतद्रव्यभोजनम्। फलकाष्ठपुष्पाणां स्तेयम्। अधैर्यम्। तच्च गीतश्रवणादि। अस्थेऽपचये अत्यन्तवैक्लव्यच्च।	सकृदाचरणे त्र्यहयावकपानम्।	०	॥/१२	यथाशक्ति।
	अभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्। एषु चतुर्षु यत्र यत्र प्रायश्चित्तविशेषो नोक्तस्तत्रैव बोध्यम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
यदुक्तं तत्प्रकीर्णकम्। इतिवचनात् अतिपातकाद्यन्यतमत्वेन विशेषतोऽनुक्तानि पापानि।	चान्द्रायणम्। पराकः। तुलापुरुषः। गवानुगमनम्। प्राजापत्यम्। एतानि सर्वपापप्रणाशकानि। पापस्य गुरुलाघवं वीक्ष्य प्रायश्चित्तान्येतानि शिष्टैर्व्यवस्थेयानि।			
अयास्पृश्यस्पर्शनम्। तच्च चाण्डालरजस्वलापतितसूतिकाशवशवस्पृष्टिव्यङ्गोन्मत्तास्थिकगाम्यान्यकुक्कुटवराहादीनां स्पर्शनम्।	अनुच्छिष्टस्य चाण्डालादिस्पर्शे अकामतः सचेलं सशिरस्कं स्नानम्। कामतः सचेलस्नानम्। महाव्याहृतिभिर्होमः। घृतप्राशनच्च। चिताधूमस्पर्शे ऋतुकालीनमैथुने दुःस्वप्ने वमने विरेके श्मशुकर्मणि यूपभस्मपचनखशवसङ्घृतदस्यां स्पर्शे स्नानपूर्वकं प्रक्षालितवस्त्रपरिधानम्। अवृतौ मैथुने मूत्रपुरीषत्यागवच्छुद्धिः।			
	सर्वाङ्गस्पर्शे त्रिरात्रोपवासः। रात्रौ शववर्णास्पृश्यस्पर्शने सुवर्णं प्रक्षिप्य अग्निं सन्निधाय दिवाकृतजलैः स्नानम्। सर्वत्र प्रागन्नप्राशनात् शिशोरभ्युक्षणम्। प्राक् चूडाकरणात् बालस्याचमनम्। प्रागुपनयनात् कुमारस्य स्नानम्।		१॥० कार्षापणः।	यथाशक्ति।
अथोच्छिष्टस्य चाण्डालादिस्पर्शः। आदिना पतितरजस्वलान्त्यजन्मशूकरमद्यभाण्डानां ग्रहणम्।	सद्यः स्नात्वा परदिने प्रायश्चित्तं करणीयम्।			
	ऊर्द्धोच्छिष्टस्य प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	कामाभ्यासे सान्तपनम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अज्ञाने त्रिरात्रोपवासः। पञ्चगव्यपानच्च।	०	१॥० कार्षापणः	यथाशक्ति।
	अर्द्धोच्छिष्टस्य अर्धादनिगीर्णग्रासस्य आमाशनोच्छिष्टस्य च प्राजापत्यपादः। आपदि ज्ञानात् विशेषो यथा।	०	॥० पणः।	यथाशक्ति।
	मूत्रत्यागाशौचिनः शवादिस्पर्शे एकोपवासः।	०	॥० पणः।	यथाशक्ति।
	पुरीषत्यागाशौचिनः शवादिस्पर्शे दिनद्वयमुपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	मैथुनाशौचिनः शवादिस्पर्शे दिनत्रयमुपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	पापाशुचीनां शवादिस्पर्शे दिनचतुष्टयमुपवासः।	०	२ कार्षापणौ।	यथाशक्ति।
अथ तलाभ्यक्तस्य चाण्डालादिस्पर्शः।	उपवासः। पञ्चगव्यपानच्च। चाण्डालोदकसंस्पृष्टस्य स्नानम्।	०	॥० पणः।	यथाशक्ति।
	उच्छिष्टस्य चाण्डालोदकस्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।